समूहः । इति हेमचन्द्रः ॥ * ॥ सभायां एकाकिगमननिषेधो यथा,—

"नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्जयेत् ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

सभाज, त् क सेवने । प्रीतौ । दर्शने । इति कविकल्पद्रुमः ॥ ( अदन्तचुरा०-पर०-सक०-सेट् । ) अससभाजत् । इति दुर्गादासः ॥

सभाजनं, क्ली, ( सभाज त् क सेवने प्रीतौ + ल्युट् । ) गमनागमनादिसमये सुहृदादेः आलिङ्गनारोग्यप्रश्नस्वागतादिनानन्दोत्पादनम् । तत्पर्य्यायः । आनन्दनम् २ आप्रच्छनम् ३ । इत्यमरः ॥ टु नदि समृद्धि सभाज त् क सेवनप्रीतिदर्शने प्रच्छौ ञ शौघ्र्ये अनट् । नन्दति: प्रच्छतिश्चाङ्पूर्व्वालिङ्गनादाविति सभूतिः । गमनसमये सुहृदमालिङ्ग्य गमनानुज्ञायाचनम् । आगतस्य वा स्वागतारोग्यादिपृच्छा आनन्दनमिति रमानाथः । इति भरतः ॥ ( यथा, रघुः । १३ । ४३ ।

"सभाजने मे भुजमूर्द्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥"

सभाजयतीति । सभाज त् क प्रीतौ + ल्युः । प्रीतिदायके, त्रि । यथा, महाभारते ।४।१३।१० ।

"प्रभूतनागाम्बरयं सभाजनं
सन्देहियुक्तं बहुपानभोजनम् ।
मनोहरं काञ्चनचित्रभूषणं
गृहं महत् शोभयतामियं मम ॥")

सभापतिः, पुं, ( सभायाः पतिः । ) समाजाधिपतिः । ( यथा, भागवते । ६ । १७ । ७ ।

"जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः ।
अङ्गीकृत्य स्त्रियञ्चास्ते गतह्रीः प्राकृतो यथा ॥")

द्यूतगृहस्वामी । इति केचित् ॥

सभासत्, सभासद् } पुं, ( सभा + सद् + क्विप् । ) सभायां सीदति उपविशति यः । तत्पर्य्यायः । सभास्तारः २ सभ्यः ३ सामाजिकः ४ । इत्यमरः ॥ पारिषद्यः ५ पार्षद्यः ६ परिषदः ७ पार्षदः ८ परिसभ्यः ९ । इति शब्दरत्नावली ॥ तल्लक्षणादि यथा । कात्यायनः ।

"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु सभ्यस्तदानृणः ॥"

सभ्यः सभायां साधुः । तथाविधानाह याज्ञवल्क्यः ।

"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः ।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये समाः ॥"

श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः । कुलीनाः स्मृत्यादि-दोषशून्यमातापितृवंश-परम्पराकाः । समाः मध्यस्थाः । सभासदः सभायां यथा सीदन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः । इति व्यवहारतत्त्वम् ॥ * ॥ अन्यच्च ।

"समः शत्रौ च मित्रे च धर्म्मशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणे भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ॥"

इति मत्स्यपुराणे १८९ अध्यायः ॥

बृहस्पतिस्तु सप्त पञ्च त्रयो वा सभासदो भवन्तीत्याह ।

"लोकवेदज्ञधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा ।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा ॥"

किञ्च ।

"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्म्मतः ॥"

तत्र ब्राह्मणा अनियुक्ताः सभासदस्तु नियुक्ता इति भेदः । तत्र नियुक्तानां यथावस्थितार्थकथनेऽपि यदि राजान्यथा करोति तदासौ निवारणीयोऽन्यथा दोषः । उक्तञ्च कात्यायनेन ।

"अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः ।
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः ॥"

इति मिताक्षरा ॥

सभास्तारः, पुं, (सभां स्तृणातीति । स्तृञ् आच्छादने + "कर्म्मण्यण् ।" ३।२।१। इत्यण् । ) सभासद् । इत्यमरः ॥ (यथा, महाभारते ।२।४६।२ ।

"के च तत्र सभास्तारा राजानो ब्रह्मवित्तम ! ॥")

सभिकः, पुं, (सभा द्यूतसभा आश्रयत्वेनास्त्यस्येति । सभा + व्रीह्यादित्वात् ठन् । ) द्यूतकारकः । इत्यमरः ॥ हे सद्दियार इति ख्याते । सभा द्यूतमस्याश्रयत्वेनास्ति सभिकः विकारसंघेति षिकः । सभा द्यूतं सभा गृहमिति रुद्रः । द्यूतं कारयति द्यूतकारकः ण्यन्तात् स्वार्थे कः । इति भरतः ॥ तत्पर्य्यायः ।

"दुरोदरश्च निर्ग्रन्थद्यूतकारककम्बकाः ।
सभिकः प्रतिभूश्चेति ———————— ॥"

इति जटाधरः ॥

( यथा, याज्ञवल्क्ये । २ । २०२ ।

"ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयात् धूर्त्तकितवादितराद्दशकं शतम् ॥" )

सभीकः, पुं, द्यूतकारकः । इति शब्दरत्नावली ॥

सभोचितः, पुं, ( सभायामुचितः । ) पण्डितः । इति धनञ्जयः ॥ सभायोग्ये, त्रि ॥

सभ्यः, पुं, (सभायां साधुः । सभा + "सभाया यः ।" ४ । ४ । १०५ । इति यः । ) साधुः । सभासद् । इत्यमरः ॥ ( यथा, मनुः । ८ । १० ।

"सोऽस्य कार्य्याणि संपश्येत् सभ्यैरेव त्रिभिर्वृतः ॥"

अस्मिन्नर्थे वाच्यलिङ्गेऽपि दृश्यते । यथा, रघुः । १ । ५५ ।

"तस्मै सभ्याः सभार्य्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥" )

सभिकः । इति जटाधरः ॥

सभ्यः, त्रि, ( सभा + यः । ) प्रत्ययितः । इति जटाधरः ॥ सभासम्बन्धी च ॥

सम्, व्य, समार्थः । प्रकृष्टार्थः । सङ्गतः । शोभनः । इति शब्दरत्नावली ॥ समुच्चयः । इति हेमचन्द्रः ॥ चतुर्थोपसर्गः । इति व्याकरणम् ॥ अस्यार्थविशेषाः संशब्दे द्रष्टव्याः ॥

समः, त्रि, (समतीति । सम वैक्लव्ये + पचाद्यच् ।) सर्व्वम् । ( अस्मिन्नर्थे सर्व्वनामसंज्ञा भवति, यथा, मुग्धबोधे ।

"नमः समसात् पूर्व्वस्मा अन्तरस्मा अमेघसाम् ॥")

समानम् । इत्यमरः ॥ ( अस्मिन्नर्थे सर्व्वनामसंज्ञा न भवति । यथा, मुग्धबोधे ।

"समायैव परायैवां सुक्तयेऽर्थान्तराय च ॥" )

साधुः । इति मेदिनी ॥

समः, पुं, ( सम वैक्लव्ये + पचाद्यच् । ) राशिविशेषाणां संज्ञाविशेषः । ते तु राशयः वृषकर्क्कटकन्यावृश्चिकमकरमीनाः । यथा,—

"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"

इति ज्योतिस्तत्त्वम् ॥ * ॥

मानस्य प्रकारविशेषः । स तु यदा गीतवाद्ययोस्तालः गायकस्य हस्तपादादिचालनञ्च एकदा समभावेन पतति तदा भवति । इति सङ्गीतशास्त्रम् ॥ * ॥ वर्गमूलानयनार्थं अङ्कोपरि दत्त ऋजुरेखाविशेषः । यथा,—

"त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्त्वा लब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत् ॥"

इत्यादि लीलावती ॥

समकन्या, स्त्री, ( समा विवाहतुल्या कन्या । ) विवाहोपयुक्ता । इति धनञ्जयः ॥ सदृशकुमारी च ॥

समकोलः, पुं, ( समः कोलो यस्य । ) सर्पः । इति त्रिकाण्डशेषः ॥

समक्तः, त्रि, गमनकर्त्ता । संपूर्व्वकाञ्चधातोः क्तप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

समक्षं, त्रि, अक्ष्णोः समीपम् । संपूर्व्वाक्षिशब्दात् अप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ ( यथा, कुमारे । ५ । १ ।

"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता ॥")

समगन्धकः, पुं, ( समास्तुल्या गन्धा गन्धद्रव्याणि यत्र । कप् । ) कृत्रिमधूपः । यथा,—

"एकधूपे भक्तकरो गिरिः स्यात् समगन्धकः ।"

इति शब्दचन्द्रिका ॥

समगन्धिकं, क्ली, ( समस्तुल्यो गन्धोऽस्यास्येति । ठन् । ) उशीरम् । इति राजनिर्घण्टः ॥ तुल्यगन्धयुक्ते, त्रि ॥

समग्रः, त्रि, (समं समकालमेव गृह्णातीति । ग्रह + डः । ) सकलम् । ( यथा, रामायणे । २ । ५२ । ८४ ।

"चतुर्द्दश हि वर्षाणि समग्राण्युष्य कानने ।